काशवत्। नीलाद्यनुभव इत्यपि तत्स्वभावोऽनुभव एव॥

**अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते ।**
**विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा ॥** (k.39)

**तथाकृतव्यवस्थेयं केशादिज्ञानभेदवत्।**
**यदा तदा न सञ्चोद्यग्राह्यग्राहकलक्षणा ॥** (k.40)

इत्यन्तरश्लोकौ॥

**तदाऽन्यसंविदोऽभावात्स्वसंवित्फलमिष्यते ।** (k.41ab)

येषां बुद्धिरेवोपदर्शितग्राह्यग्राहकाकारोत्पद्यते' तेषामन्यस्य सं-
A12b वेद्यस्याभावात्स्वसंवेदनं फलम्' तत्स्वभावत्वादर्थप्रतिपत्तेः। यदि
B12b हीष्टाकारः सोऽनुभवोऽनिष्टाकारो वा' तदेष्टोऽनिष्टो वा विषयः प्रतिविदितो भवति। विद्यमानेऽपि हि बाह्येऽर्थे यथास्वसंवेदनमेवार्थनिष्पत्तेस्तदेव फलं युक्तम्। न ह्यर्थस्य यथास्वभावं व्यवस्थितिः' सर्वज्ञानानामेकाकारत्वप्रसङ्गात्। अनेकाकारास्तु विज्ञप्तयः' येनैकं रूपमेकस्य मनआपमन्यस्यामनआपं दृष्टम्॥

e–e Ce'e PV 3.328cd f–f Ce' PV 3.330c–332b g–g Ce' PV 3.332cd h–h Ce'e PV 3.340 i–i Ci'e PSṬ 1.68,12–14 (Kellner, e-mail 21.3.05) j–j Ce'e PV 3.341a–c' k–k Ci' PSṬ 1.68,15–69,1 (Kellner, e-mail 21.3.05)

[7] Verse 41 has only two pādas, but cf. note on 37,7. [9] phalaṃ AC ('bras bu yin te T) : phalaṃ bhavet B [10] tadeṣṭo 'niṣṭo vā (tadā iṣṭo niṣṭo vā A) : tadeveṣṭo niṣṭo vā C : iṣṭāniṣṭo B; tadā n.e. T [11f] eva n.e. T [13] °jñānānām BC : °jñānānam A [14] ekasya AB : ekaikasya C



इष्टानिष्टावभासिन्यः कल्पना नेन्द्रियबुद्धय इति चेत्' न' तत्रा- C15a
प्यरिष्टादावप्रतिसन्धानदर्शनात्' अन्यत्रापि शब्दगन्धरसविशेषैरभिन्नैः प्राणिविशेषाणामैन्द्रियकस्यैव सुखासुखस्योत्पत्तेः। तस्मात्स्वसंवेदनरूपैवार्थप्रतीतिः। तस्याश्च विषयाकारतैव साधनम्' यथाकारमस्याः प्रथनात्। अर्थस्थितेः स्वसंवेदनरूपत्वात्स्वविदपीयमर्थविदेव कार्यतो द्रष्टव्या। अत एव न प्रमाणफलयोर्विषयभेदः। स्वभावचिन्तायां तादात्म्यादर्थसंविदः स्वसंवित्फलमुच्यते॥

**तथाऽवभासमानस्य तादृशोऽन्यादृशोऽपि वा ।**
**ज्ञानस्य हेतुरर्थोऽपीत्यर्थस्येष्टा प्रमेयता ॥** (k.42)

**यथाकथञ्चित्तस्यार्थरूपं मुक्त्वाऽवभासिनः ।**
**अर्थग्रहः कथं सत्यं न जानेऽहमपीदृशम् ॥** (k.43)

इत्यन्तरश्लोकौ॥

l–l Ce'e PV 3.344ab (LINDTNER 1984: 164) m–m Ce'e PV 3.344cd n–n Ce'e PV 3.348c–349 o–o Ce'e PV 3.350 p–p DhPr 91,16 (VETTER: 90) q–q Ce' PV 3.351 r–r Ce' PV 3.352

[3] aindriyaka° A : aindriya° BC • °va BC : °vu A [4] °ārthapratītiḥ AB : °ārthapratītāv arthapratītiḥ C [6] eva n.e. T • °bhedaḥ BC : °bhedeḥ A; yaṅ add. T [7] This sentence is metrical in T, but unmetrically rephrased in PVin. Birgit Kellner proposed an emendation arthasaṃvitteḥ metri causa for arthasaṃvidaḥ and to identify tādātmyād arthasaṃvitteḥ svasaṃvit phalam ucyate ‖ as the missing k.41cd. For an earlier attempt to solve these problems cf. LINDTNER 1984: 163f. • ucyate C, ·cyate B (bśad T) : iṣyate A [8] °dṛśo AC : °dṛśe B [9] artho AB : ano C [11] satyaṃ BC : satya A

कथं पुनरसति बाह्येऽर्थे प्रमाणप्रमेयफलस्थितिः। उक्तमत्र – यथादर्शनमियं व्यवस्था न तु यथातत्त्वमिति। विषयाकारः कश्चित्परिच्छेदश्चान्तरः स्वसंविदितरूपो जायमानो लक्ष्यते। तत्र यथालक्षणमेवेयं मेयमानफलस्थितिः ॥

A13a B13a

अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ (k.44)

C15b मन्त्राद्युपप्लुताक्षाणां यथा मृच्छकलादयः ।
अन्यथैवावभासन्ते तद्रूपरहिता अपि ॥ (k.45)

तथैवादर्शनात्तेषामनुपप्लुतचक्षुषां ।
दूरे यथा वा मरुषु महानल्पोऽपि दृश्यते ॥ (k.46)

यथानुदर्शनं चेयं मेयमानफलस्थितिः ।
क्रियतेऽविद्यमानाऽपि ग्राह्यग्राहकसंविदाम्॥ (k.47)

अन्यथैकस्य भावस्य नानारूपावभासिनः ।
सत्यं कथं स्युराकारास्तदेकत्वस्य हानितः ॥ (k.48)

अन्यस्यान्यत्वहानेश्च नाभेदोऽरूपदर्शनात्।

s–s Cf. kk.39–40 (Vetter: 91) t–t Ce' PV 3.353–362 u–u NM$_K$ 294,6f

1 °phala° AB : om. C 2 iyaṃ AC : eṣā B · viṣayākāraḥ AC : viṣāyāraḥ B 4 meyamāna° AB (cf.k.47b) : mānameya° C 9 mig … rnams kyis T for °cakṣuṣā 11 yathānudarśanaṃ ceyaṃ AB : yathādarśanam eveyaṃ C 13 °rūpā° AB : °dharmmā° C 14 °tvasya BC : °tvāsya A · hānitaḥ AC : hanitaḥ B



रूपाभेदं हि पश्यन्ती धीरभेदं व्यवस्यति ॥ (k.49)

भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः ।
यस्मादेकमनेकं च रूपं तेषां न विद्यते ॥ (k.50)

साधर्म्यदर्शनाल्लोके भ्रान्तिर्नामोपजायते ।
अतदात्मनि तादात्म्यव्यवसायेन नेह तत्॥ (k.51)

अदर्शनाज्जगत्यस्मिन्नेकस्यापि तदात्मनः ।
अस्तीयमपि या त्वन्तरुपप्लवसमुद्भवा ॥ (k.52)

दोषोद्भवात्प्रकृत्या सा वितथप्रतिभासिनी ।
अनपेक्षितसाधर्म्यदृगादिस्तैमिरादिवत् ॥ (k.53)

इत्यन्तरश्लोकाः ॥

भवतु नाम यथादर्शनं प्रमाणादिव्यवस्था विज्ञप्तिमात्रतायां सैव कथं सिध्यति। उक्तमत्र – ग्राह्यग्राहकलक्षणायोगादिति॥

अपि च

सहोपलम्भनियमादभेदो नीलतद्धियोः ।

v–v Cf. PVin 1.38c w Cf. 30 n. j x–x Cie NBhūṣ 107,7–108,3 y–y Only k.54: DAṬ 67,6f (Jambūvijaya 1981: 136) z–z ṚVi 79,6; NM$_K$ 297,5; 280,8; Vyom 527,11; SVṬ 418,13; ĪPVV II 78,22; SDS 13,9; NVinV II 226,11

5 °sāyena AB : °sānena C 7 antarupa° C : antarūpa° AB 11 vijñapti° AC : vijñāpti° B · saiva AB : seva tu C 12 grāhya‹grāhaka›lakṣaṇā° A : grāhyalakṣaṇā° BC